# महाकविर्दण्डी तस्य साहित्यकृतिश्च

## महाकविर्दण्डी

"जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत्।

कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि॥"

इत्यवमादिभिः प्राचीनसहृदयवचनैः संस्कृतसाहित्ये दण्डिनो महती प्रतिष्ठाऽनुमीयते। "दण्डिनः पदलालित्यम्" इत्युक्तिरपि तस्य प्रसिद्धौ प्रमाणम्। गद्यलेखकेषु दण्डी स्वं विशिष्टं स्थानं रक्षति। अस्य महाकवेः आविर्भावविषये विदुषां विप्रतिपत्तिः परिलक्ष्यते। तथापि विद्वद्भिः तस्य आविर्भावविषये यानि मतानि प्रदत्तानि एभिः प्रमाणैः दण्डिनः समयस्य परसीमा अष्टमशतकमिति वक्तुं शक्यते। केचन सुबन्धोः पूर्ववर्ती दण्डी इति कथयन्ति। मैक्समूलर-वेबर-मैक्डोनल-याकोवि-प्रभृतयः पाश्चात्याः विद्वांसो दण्डिनः समयं षष्ठशतकं मन्यन्ते। केचन पुनः सप्तमशतकं दण्डिनः कालरूपेण अङ्गीकुर्वन्ति।

अवन्तिसुन्दरीकथसारात् ज्ञायते यत् दण्डी वाल्यकाले एव पितृभ्यां वियुक्तः अभवत्। ततः सरस्वत्या श्रुतेन च स पालितः अभवत्। स काञ्च्याः निवासी आसीत्। तत काञ्चीराजस्य नरसिंहवर्मणः राजसभायाम् स एकस्मिन् उच्चपदे आसीनः आसीत्। दशकुमारस्य रचयिता दण्डी काव्यादर्शस्य रचयिता दण्डी एक एव न वेति विषये पण्डितानां मतानैक्यं वर्तते। तथापि दण्डिनः विषये एतत्त अत्यन्तं प्रसिद्धिं भजते यत्, "त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः"

इति। एतदुक्तिमनुसृत्य काव्यादर्शः, दशकुमारचरितम्, अवन्तिसुन्दरीकथा इति त्रयो ग्रन्थाः दण्डिनः कथ्यन्ते।

## दशकुमारचरितम्

इदमाख्यानप्रधानमेकं कथानकम्। अत्र नानाविधा रोमञ्चकानिण्यो घटना वर्णिता या विस्मयं जनयन्ति। अत्र केचिद् भयानके बने सञ्चरतां हिंस्रजन्तूनां चीत्कारः, क्वचित् समुद्रे नौमज्जनम्, क्वचिद्वेश्यावञ्चनम्, क्वचित् गृहिणीगौरवम्, एवं मिथ्यासत्यविविधघटनावलीपूर्णतया रोकचमिदं कथानकं नितान्तसजीवम्।

ग्रन्थेऽस्मिन् अंशद्वयम् अस्ति- पूर्वपीठिका उत्तरपीठिका च। पूर्वपीठिकायाम् उच्छवासपञ्चकं दृश्यते, उत्तरपीठिकायाम् उच्छवासाष्टकं दृश्यते। दशकुमारचरितम् इति नामानुसारम् अस्मिन् ग्रन्थे दश कुमाराणां वृत्तान्तः अपेक्षितः वर्तते। किन्तुः प्रथमतः उच्छवासाष्टके कुमाराष्टकस्य वृत्तान्तः वर्णितः। एतस्मात् असम्पूर्णताकारणादेव परवर्तिनि काले पूर्वपीठिका उत्तरपीठिका चेति अंशद्वयम् मूलग्रन्थेन सह संयुक्तम्। मगधराजः राजहंसः मालवराजस्य मानसारस्य समीपे युद्धेन पराजितः सन् पत्न्या वसुमत्या सह विन्ध्यपर्वते आश्रयं स्वीचकार। तत्र राज्ञः पुत्रसन्तानलाभः अभवत्। तस्य नाम आसीत् राजवाहनः इति। अन्ये नव मन्त्रिपुत्राः घटनाक्रमेण तत्र सम्मिलिताः अभवन्। ते सर्वेऽपि कुमाराः वयःप्राप्ताः भवन्तः विविधासु विद्यासु पारदर्शिनः सन्तः ऋषेः वामदेवस्य निर्देशानुसारं राजहंसस्य अनुमतिमादाय ते दिग्विजयार्थं यात्रां कृतवन्तः। ते अपि कुमाराः देशभ्रमणार्थं बहिर्गतवन्तः विन्ध्यारण्यं च समुपस्थितवन्तः। तत्र ब्राह्मणवेशिना किरातमातङ्गेन सह राजवाहनस्य साक्षात्कारः अभवत्।

पातालकन्यया कालिन्द्या सह मातङ्गस्य विवाहकार्ये साहाय्यार्थं सर्वेषाम् अगोचरेण राजवाहनः प्रस्तानं कृतवान्। अन्ये कुमारा अपि राजकुमारस्य अन्वषणार्थं बहिः निर्गम्य परस्परेभ्यः विच्छिन्नाः अभवन्। घटनाक्रमेण ते पुनः सम्मिलिताः अभवन्। भ्रमणाभिज्ञाः ते पुनः स्वकीयं मतं प्रकटिकृतवन्तः। अतः दशकुमारचरितम् भवति दशकुमाराणाम् अभिज्ञतालब्धानां घटनानाम् रमणीयालेख्यमाला।

दशकुमारचरितम् विविधैः वैचित्र्यैः समृद्धम्। तदानीन्तकालस्य नैतिकी अवनतिः कविना आलिखिता। लोभः, असाधुता, प्रतारणा, गुप्तप्रणयः, नारीहरणम्, चौर्यम् इत्यादीनि सामाजिकदु र्वृत्तानि अत्र वास्तवोपयोगेन समुपस्थापितानि। गद्यकाव्यस्य रीत्यनुसारम् विविधेषु स्थानेषु गौड़ी रीतिः परिलक्ष्यते, समासबहुलस्य ओजोगुणस्य च समावेशः दृश्यते। तस्य वर्णनायाम् सरलवर्णनम्, ललितं वर्णनम्, तथा सावलीलं च वर्णनं प्राप्यते। तस्मात् दण्डिनः कृतिविषये उच्यते - "दण्डिनः पदलालित्यम्" इति। अध्यापकेन कीथमहोदयेन उक्तम् - "Dandin is unquestionably masterly in his use of language. He is perfectly capable of simple easy narrative, and in the speeches which he gives to his characters he avoids carefully the error of elaboration of language." इति शम्॥